श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिसप्ततितमः सर्गः ॥

## स्वीयं मृतं बालकमुपादाय राजद्वारि समागत्य कस्यचिद् ब्राह्मणस्य विलापः

प्रस्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः।
प्रमुमोद सुखी राज्यं धर्मेण परिपालयन् ॥ **7.73.1** ॥

ततः कतिपयाहःसु वृद्धो जानपदो द्विजः।
मृतं बालमुपादाय राजद्वारमुपागमत् ॥ **7.73.2** ॥

रुदन् बहुविधा वाचः स्नेहदुःखसमन्वितः।
असकृत् पुत्रपुत्रेति वाक्यमेतदुवाच ह ॥ **7.73.3** ॥

किं नु मे दुष्कृतं कर्म पुरा देहान्तरे कृतम्।
यदहं पुत्रमेकं तु पश्यामि निधनं गतम् ॥ **7.73.4** ॥

अप्राप्तयौवनं बालं पञ्चवर्षसहस्रकम्।
अकाले कालमापन्नं मम दुःखाय पुत्रक ॥ **7.73.5** ॥

अल्पैरहोभिर्निधनं गमिष्यामि न संशयः।
अहं च जननी चैव तव शोकेन पुत्रक ॥ **7.73.6** ॥

न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहम्।
सर्वेषां प्राणिनां पापं न स्मरामि कदाचन ॥ **7.73.7** ॥

केनाद्य दुष्कृतेनायं बाल एव ममात्मजः।
अकृत्वा पितृकार्याणि गतो वैवस्वतक्षयम्॥ **7.73.8** ॥

नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम्।
मृत्युरप्राप्तकालानां रामस्य विषये ह्ययम्॥ **7.73.9** ॥

रामस्य दुष्कृतं किञ्चिन्महदस्ति न संशयः।
यथा हि विषयस्थानां बालानां मृत्युरागतः॥ **7.73.10** ॥

नह्यन्यविषयस्थानां बालानां मृत्युतो भयम्।
स राजञ्जीवयस्वैनं बालं मृत्युवशं गतम्॥ **7.73.11** ॥

राजद्वारि मरिष्यामि पत्न्या सार्धमनाथवत्।
ब्रह्महत्यां ततो राम समुपेत्य सुखी भव॥ **7.73.12** ॥

भ्रातृभिः सहितो राजन् दीर्घमायुरवाप्स्यसि।
उषिताः स्म सुखं राज्ये तवास्मिन् सुमहाबल॥ **7.73.13** ॥

इदं तु पतितं तस्मात् तव राम वशे स्थितान्।
कालस्य वशमापन्नाः स्वल्पं हि नहि नः सुखम्॥ **7.73.14** ॥

सम्प्रत्यनाथो विषय इक्ष्वाकूणां महात्मनाम्।
रामं नाथमिहासाद्य बालान्तकरणं ध्रुवम्॥ **7.73.15** ॥

राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः।
असद्वृत्ते हि नृपतावकाले म्रियते जनः॥ **7.73.16** ॥

यद् वा पुरेष्वयुक्तानि जना जनपदेषु च।
कुर्वते न च रक्षास्ति तदा कालकृतं भयम्॥ **7.73.17** ॥

सुव्यक्तं राजदोषो हि भविष्यति न संशयः।
पुरे जनपदे चापि तथा बालवधो ह्ययम्॥ **7.73.18**॥

एवं बहुविधैर्वाक्यैरुपरुध्य मुहुर्मुहुः।
राजानं दुःखसन्तप्तः सुतं तमुपगूहति॥ **7.73.19**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिसप्ततितमः सर्गः॥